योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०६०

षष्टितमः सर्गः ६०

श्रीवसिष्ठ उवाच ।

एवमाद्यं परं तत्त्वं चिद्घनं परमं पदम् ।

तत्स्था एते महारूपा ब्रह्मविष्णुहरादयः ।। ५

विभूतिभिः स्फुरन्त्युच्चैर्जनास्तुष्टा नृपा इव ।

आकाशगमनाद्याभिः क्रीडाभिः क्रीड्यते चिरम्।। २

तत्स्थेनैव जनेनेह स्वर्गे स्वर्गौकसो यथा ।

तत्प्राप्याङ्ग न म्रियते तत्प्राप्याङ्ग न शोच्यते ।। ३

तत्प्राप्य जीव्यते नाङ्ग तत्प्राप्याङ्ग न रुध्यते ।

अपारपरमाकाशरूपिणः परमात्मनः ।। ४

सत्तासामान्यरूपं चेन्मनागपि विभाव्यते ।

तत्त्वं निमेषमात्रेण जन्तुर्मुक्तमना मुनिः ।

कुर्वन्संसारकर्माणि न भूयः परितप्यसे ।। ५

श्रीराम उवाच ।

मनो बुद्धिरहंकारश्चित्तं यत्र क्षयं गतम् ।

सत्तासामान्यमाभातं मनस्वी स किमुच्यते ।। ६

श्रीवसिष्ठ उवाच ।

यद्ब्रह्म सर्वदेहस्थं भुङ्क्ते पिबति वल्गति ।

आदत्ते विनिहन्त्यन्तः संवित्संवेद्यवर्जितम् ।। ७

तत्सर्वगतमाद्यन्तरहितं स्थितमर्जितम् ।

सत्तासामान्यमखिलं वस्तुतत्त्वमिहोच्यते ।। ८

तत्स्थितं खतया व्योम्नि शब्दे शब्दतया स्थितम् ।

स्पर्शे स्थितं स्पर्शतया त्वचि तत्त्वक्तया स्थितम् ।। ९
रसे लीनं रसतया रसनायां तु तत्तया ।
रूपे रूपतया दृष्टं नेत्रे लीनं च दृक्तया ।। १०
ध्राणे घ्राणतया दृष्टं गन्धे गन्धतयोदितम् ।
पुष्टं कायतया काये भूमावपि च भूतया ।। ११
पयस्तया च पयसि वायौ वायुतया स्थितम् ।
तेजस्तया तेजसि च बुद्धौ बुद्धितया गतम् ।। १२
मनस्तया मनस्यन्तरहंकृत्याप्यहंकृतौ ।
रूढं संविदि संवित्त्या चित्ते चित्ततयोत्थितम् ।। १३
वृक्षे वृक्षतया लग्नं पटे पटतयोदितम् ।
घटे घटतया रूढं वटे वटतयोत्थितम् ।। १४
स्थावरे स्थावरत्वेन जंगमत्वेन जंगमे ।
पाषाणत्वेन पाषाणे चेतनत्वेन चेतने ।। १५
अमरेष्वमरत्वेन नरत्वेन नरेषु च ।
तिर्यक्त्वेन च तिर्यक्षु क्रिमित्वेन क्रिमिस्थितौ ।। १६
कालक्रमे कालतया ऋतावृतुतया तथा ।
त्रुटिक्षणनिमेषादौ संस्थितस्तत्तया विभुः ।। १७
शुक्ले शुक्लतया जातं कृष्णे कृष्णतया स्थितम् ।
क्रियासु स्पन्दरूपेण नियतौ नियमेन च ।। १८
संस्थितः संस्थितौ स्थित्या नाशे नाशतया स्थितः ।
उत्पत्तिरूपेणोत्पत्तावास्थितः परमेश्वरः ।। १९
बाल्येन बाल्ये विश्रान्तो यौवने यौवनेन च ।
जरसा च जरारूपे मरणे मरणेन च ।। २०
इति सर्वपदार्थानामभिन्नः परमेश्वरः ।
कल्लोलसीकरोर्मीणामब्धाविव पयोभरः ।। २१
नानातैषां त्वसत्यैव सत्येनानेन चैव हि ।

कल्पिता चित्स्वभावेन वेतालः शिशुना यथा ।। २२

सर्वत्र संस्थितिमता विगतामयेन

व्याप्तं मयेदमखिलं विविधैर्विलासैः ।

चिद्रूपिणैव कलना कलितात्मनेति

मत्वोपशान्तमतिरास्स्व सुखं महात्मन्।।२३

श्रीवाल्मीकिरुवाच ।

इत्युक्तवत्यथ मुनौ दिवसो जगाम

सायंतनाय विधयेऽस्तमिनो जगाम ।

स्नातुं सभा कृतनमस्करणा जगाम

श्यामाक्षये रविकरैश्च सहाजगाम ।। २४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० विभूतियोगोपदेशो नाम षष्टितमः सर्गः ।। ६० ।।